International Journal of Sanskrit Research 2024; 10(2): 79-86

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 79-86
© 2024 IJSR
www.anantaajournal.com
Received: 15-01-2024
Accepted: 20-02-2024

**Sagar Bera**
Research Scholar (Ph.D),
University of Delhi, Delhi,
India

Corresponding Author:
**Sagar Bera**
Research Scholar (Ph.D),
University of Delhi, Delhi,
India

# संक्षिप्तसारव्याकरणस्य कारकतत्त्वविमर्शः

## Sagar Bera

**सारांशः**

अत्र शोधपत्रे संक्षिप्तसारव्याकरणमनुसृत्य सर्वेषां कारकाणां विश्लेषणं क्रियते। अत्र भूमिकांशे पाणिनेः पूर्ववर्तिनां तथा परवर्तिनां वैयाकरणानाम् आलोचना क्रियते। एवञ्च संक्षिप्तसारकारस्य क्रमदीश्वराचार्यस्य परिचयः दीयते। अनन्तरं संक्षिप्तसारव्याकरणस्य नामकरणम् इत्यस्मिन्नंशे संक्षिप्तसारस्य सूत्रसंख्या तथा नामकरणविषये आलोचना क्रियते। अनन्तरं संक्षिप्तसारव्याकरणस्य कारकतत्त्वम् इत्यस्मिन्नंशे कर्तृकर्मादीनां कारकाणां सूत्रदृष्ट्या विश्लेषणं क्रियते संक्षिप्तसारव्याकरणमनुसृत्य । पुनः विवक्षातः कारकाणि भवन्ति इति नियममनुसृत्य संक्षिप्तसारे विवक्षावशात् कारकाणि भवन्ति इति सूत्रं क्रियते तस्यापि विश्लेषणमत्र प्रबन्धे क्रियते । पुनः निष्कर्षे अस्य प्रबन्धस्य विषये स्वमतानि दीयन्ते।

**कूटशब्दः** संक्षिप्तसारव्याकरणस्य नामकरणम्, संक्षिप्तसारव्याकरणमनुसृत्य, संक्षिप्तसारस्य सूत्रसंख्या

## प्रस्तावना

वैयाकरणाचार्येण पाणिनिना विरचिता अष्टाध्यायी । अत्र शब्दानां साधुत्वप्रदर्शनाय सूत्राणां रचना क्रियते आचार्येण । एवञ्च वार्तिककारेण कात्यायनेन पाणिनिसूत्रस्योपरि वार्तिकं विरचितम् । एवम्प्रकारेण सूत्राणां वार्तिकानाञ्च परिष्कर्तुम् पतञ्जलिना भाष्यं विरचितम् । पाणिनीयव्याकरणं त्रिमुनिव्याकरणनाम्ना अपि परिचितमस्ति । त्रिमुनिविषये भट्टोजिदीक्षितेन उच्यते—

"मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।
वैयाकरणसिद्धान्तकौमुदीयं विरच्यते"[1] ।। इति

यद्यपि पाणिनीयव्याकरणस्य संस्कृतशास्त्रे प्रसिद्धिः वर्तते तथापि पाणिनेः पूर्वमप्यनेके वैयाकरणाः प्रसिद्धाः आसन् तेषां नामानि अस्माभिः पाणिनेः अष्टाध्याय्यां प्राप्यन्ते । ते यथा – काश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-शाकटायन-शाकल्य-सेनक-स्पोटायनादयः। एतदतिरिच्य अन्येऽप्याचार्याः

[1] .वैयाकरणसिद्धान्तकौमुदी पूर्वार्धः श्लोकः 1.

प्राचीनकाले प्रसिद्धाः आसन् । एतेषामाचार्याणां नामानि पाणिनिना सूत्रेषु न उल्लिख्यन्ते । एतेषामाचार्याणामिन्द्र-काशकृत्स्न-पौष्करसादि-भागुरि-वैयाघ्रपद्यादयः प्रसिद्धाः । वैयाकरणैः अष्टानां नवानां वा व्याकरणसम्प्रदायानामस्तित्वं स्वीक्रियते । तस्मात् वोपदेवेन तस्य कविकल्पद्रुमे अष्टानां वैयाकरणानां नामान्युल्लिख्यन्ते —

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः[2] ।।

एतेषु वैयाकरणेषु इन्द्रः आसीत् प्राचीनतमः । तस्य व्याकरणस्य नाम ऐन्द्रव्याकरणम् । स व्याकरणशास्त्रस्य प्रथमप्रवक्ता आसीत् तैत्तिरीयसंहितायामस्य प्रमाणं समुपलभ्यते । तत्र उच्यते – वाग्वै पराच्यव्याकृताऽवदत्ते देवा इन्द्रमब्रुवन्निमान्नोवाचं व्याकुर्विति । सोऽब्रवीत् । वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति । तस्मादैन्द्रवायवः सह गृह्यते । तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यते[3] । इति । अर्थात् पूर्वं यदा वाग् अव्याकृता आसीत् तदा देवाः इन्द्रं तां वाचं विभक्तुं आदिशन्ति । तदानीमिन्द्रः देवानां समीपे वायुना सहैकस्मिन्नेव पात्रे सोमरसग्रहणरूपं वरं लब्ध्वा तां वाचं विभाजयति । तस्मात् इयं व्याकृता वागुच्यते । एवम्प्रकारेण दृश्यते यत् पाणिनेः पूर्वं तथा च परमनेके व्याकरणसम्प्रदायाः आसन् । इतोऽपि पाणिनीपरवर्तिव्याकरणेषु केषाञ्चित्प्रसिद्धव्याकरणानां नाम यथा — जैनेन्द्रम् , मुग्धबोधम् , हरिनामामृतम् , संक्षिप्तसारमित्यादीनि । तत्र संक्षिप्तसारस्य रचयिता क्रमदीश्वराचार्यः। यथैव पाणिनिव्याकरणे पाणिनि-कात्यायन-पतञ्जलयः त्रिमुनयः इति नाम्ना प्रसिद्धाः सन्ति तथैव क्रमदीश्वर-जुमरनन्दि-गोयीचन्द्राः संक्षिप्तसारस्य त्रिमुनयः इत्युच्यन्ते । क्रमदीश्वरः अस्य व्याकरणस्य सूत्रकारः, जुमरनन्दी अस्य व्याकरणस्य वृत्तिकारः, तस्य वृत्तेः नाम रसवती , गोयीचन्द्रः अस्य व्याकरणस्य टीकाकारः , तस्य टीकायाः नाम विवरणी। तस्मादुच्यते संक्षिप्तसारस्य प्रत्येकं पादस्यान्ते— "महापण्डितश्रीक्रमदीश्वराचार्य्यकृते संक्षिप्तसारे महाराजाधिराज-श्रीमज्जुमरनन्दिपरिशोधितायां रसवत्यां वृत्तौ औत्थासनिकश्रीगोयीचन्द्रविरचितायां विवरणीनामटीकायां पञ्चमः कारकपादः समाप्तः[4] " इति ।

गुरुपदहालदारमहोदयस्य व्याकरणदर्शनेर इचिहास इति ग्रन्थे क्रमदीश्वरः वङ्गदेशीयः इत्यनुमीयते । तत्रोच्यते हालदारमहोदयैः –

क्रमदीश्वरविप्रेण वङ्गीयेन ततःपरम् ।
संक्षिप्तसारनाम्ना तु महद्व्याकरणं कृतम् [5]। इति

**संक्षिप्तसारस्यान्ते क्रमदीश्वरस्य परिचयज्ञापकः एकः श्लोकः समुपलभ्यते । यथा –**

विद्यातपोऽर्थिवादीन्द्रः पूर्वग्रामि-द्विजः कविः ।
संक्षिप्तसारनाम्ना तु महद्व्याकरणं कृतम् [6] ।। इति

क्रमदीश्वरस्य पितुः नाम चक्रपाणिः , तस्य पितामहः आसीत् श्रीपतिः , सः पूर्वग्रामवासी, द्विजः तथा कविः, एवञ्च वादीन्द्रः आसीत् तस्योपाधिः ।

### संक्षिप्तसारव्याकरणस्य नामकरणम्

विशालकायग्रन्थात् सारं गृहीत्वा अस्य ग्रन्थस्य रचना क्रियते तस्मात् ग्रन्थस्यास्य नाम संक्षिप्तसारः वर्तते , अनेके एवं चिन्तयितुं शक्यन्ते परन्तु तन्न वक्तव्यम् । यतो हि व्याकरणमिदं संक्षिप्तः न वर्तते । अत्र व्याकरणे परिशिष्टादिभिः सह सूत्रसंख्या वर्तते 4699, तथा च प्राकृतपादस्य सूत्रसंख्या 474 । एवम्प्रकारेण साकल्येन अत्र सूत्रसंख्या वर्तते 5173। अपि चात्र छन्दःप्रकरणं तथा सार्धपञ्चाशत् श्लोकसमन्वितमलङ्कारप्रकरणम् वर्तते । अत एव व्याकरणमिदं संक्षिप्तं नैव वर्तते । सुतरां कस्मादपि एकस्मात् विशालकायग्रन्थात् न, परन्तु अनेकेषां व्याकरणग्रन्थानां सारसंग्रहणेन अस्य व्याकरणस्य रूपायणं भवति तस्मात् ग्रन्थस्यास्य नाम संक्षिप्तसारः । गोयीचन्द्रेण मङ्गलाचरणस्य टीकायां संक्षिप्तसारस्यार्थविषये उच्यते — शास्त्रान्तरेषु सत्स्वपि...संक्षिप्तः संगृहीतः सारो यत्र तत् संक्षिप्तसारम्[7]। इति

### संक्षिप्तसारव्याकरणस्य कारकतत्त्वम्

आचार्यक्रमदीश्वरेण संक्षिप्तसारव्याकरणे कारकविषयकालोचनायाम् आदौ कर्तृकर्मादीनां कारकाणां आलोचना कृता । अनन्तरं तेन विभक्तिविषयकणां सूत्राणां आलोचना कृता । अत्र कारकविषयकाणि यानि सूत्राणि सन्ति तेषामेव विश्लेषणं क्रियते संक्षिप्तसारमनुसृत्य।

---

[2]. कविकल्पद्रुमः श्लोकः 2.

[3]. तै.सं. 6/4/7.

[4] . संक्षिप्तसारव्याकरणम्, भाग-3. सम्पा. आर् एस् सैनी. पृष्ठा-160.

[5] . व्याकरण दर्शनेर इतिहास भाग 1. पृष्ठा-455.

[6] . संक्षिप्तसारव्याकरणम् . सम्पादक. गुरुनाथविद्यानिधि. पृष्ठा -524.

[7]. संक्षिप्तसारव्याकरणम् . सम्पादक. गुरुनाथविद्यानिधि. पृष्ठा-2.

**कर्त्तृकारकम्**

संक्षिप्तसारे कर्तृकारकस्य प्रधानसूत्रम् अस्ति क्रियामुख्यप्रयोजकौ कर्त्ता[8] इति। परन्तु क्रियायाः संज्ञाविषये उच्यते — 'क्रिया सर्वे धात्वर्थाः करोत्यर्थो वा'[9] इति। अर्थात् गमनम्, भोजनम्, शयनम्, दर्शनम् इत्येतेषां धातूनामर्थः एव क्रिया उच्यते। कृधातोः अर्थः करणम् , एतदपि क्रिया उच्यते 'सर्वो हि धात्वर्थः करोत्यर्थेनाभिव्याप्तः'[10] इति नियमात् । अत्र सूत्रे उच्यते यत् क्रियायां साध्यायां कारकेषु यः मुख्यः अन्येषां कारकाणां आयोजनार्थत्वात् , स कर्तृसंज्ञः स्यात् । इतोऽपि कर्तुः यः प्रयोजकः तस्यापि कर्तृसंज्ञा भवति । अत्रोदाहरणं दीयते – पाचयत्योदनं देवदत्तेन यज्ञदत्तः । अत्र पाकक्रियायाः साधने कारकेषु देवदत्तः मुख्यः कर्मादिकारकाणामायोजनार्थत्वात् तस्मात् देवदत्तः कर्तृसंज्ञकः भवति। पुनः कर्तुः देवदत्तस्य प्रयोजकः यज्ञदत्तः। तस्मात् तस्यापि कर्तृसंज्ञा भवति। अत्र सूत्रे क्रियामुख्यप्रयोजकौ इति द्विवचनम् पुनः कर्त्ता इत्यत्र एकवचनम् वर्तते। अत्र उद्देश्यविधेयभावान्वये लिङ्गवचनस्यातन्त्रत्वम्[11] इति नियमेन उक्तस्थाने वचनव्यत्ययः भवति। पाणिनिना कर्त्तृसंज्ञायाः सूत्रं कृतम् स्वतन्त्रः कर्ता[12] इति। अनेन सूत्रेण क्रियायां स्वातन्त्र्येण विवक्षितस्य अर्थस्य कर्तृसंज्ञा क्रियते। स्वातन्त्र्यशब्दस्य अर्थः प्राधान्यम् मुख्यं वा। अतः उभयत्र व्याकरणे सूत्रार्थः समानः एव। परन्तु संक्षिप्तसारे उपरोक्तेनैकेनैव सूत्रेण क्रियायां साध्यायां कारकेषु यः मुख्यः तथा कर्तुः यः प्रयोजकः तयोः उभयोरेव कर्तृसंज्ञा स्यात्। परन्तु पाणिनीयव्याकरणे स्वतन्त्रः कर्ता इति सूत्रेण केवलं क्रियायाः साधने यः मुख्यः तस्यैव कर्तृसंज्ञा भवति। प्रयोजकस्य कर्तृसंज्ञार्थं पाणिनिना पृथक्सूत्रं कृतम्। तत् सूत्रं यथा – तत्प्रयोजको हेतुश्च[13] इति सूत्रम् ।

**कर्मकारकम्**

क्रमदीश्वराचार्येण कर्मकारकस्य प्रधानं सूत्रं कृतम् तत्समुद्दिष्टं कर्म[14] इति। कर्त्रा समुद्दिष्टं वस्तु कर्म भवति इति सूत्रार्थः। अस्मिन् सूत्रे कर्मकारकस्य चतुर्णां प्रकाराणामुल्लेखः क्रियते। तद्यथा – प्राप्यम्, निर्वर्त्त्यम्, विकार्यम् अनीप्सितञ्च। प्राप्यकर्मणः उदाहरणं दीयते – देवदत्तो ग्रामं गच्छति[15] । अर्थात् देवदत्तो गमनेन ग्रामं प्राप्नोति इत्यर्थः। कर्तुः क्रियया यस्य प्रकाशः भवति तत् निर्वर्त्तकर्म । निर्वर्त्तकर्मणः उदाहरणं दीयते – कटं करोति[16] । कर्तुः क्रियया यस्य स्वतः एवानुच्छिद्यमानत्वेन उच्छिद्यमानत्वेन वा अवस्थान्तरप्राप्तिः भवति तत् विकार्यं कर्म । अस्य कर्मणः उदाहरणं दीयते – वस्त्रं रजति[17] । अत्र वस्त्रस्य अनुच्छिद्यमानत्वेन अवस्थान्तरप्राप्तिः वर्तते। यत् न प्राप्यं न निर्वर्त्त्यं न विकार्य्यम् केवलम् अनीप्सितत्त्वेन कर्त्रा समुद्दिष्टं तत् अनीप्सितं कर्म । यथा – पापं त्यजति[18]। इतोऽपि संक्षिप्तसारे – धर्मं सूत्रयति, बलिं बन्धयति, कंसं घातयति[19] इत्यादीनां नूतनानामुदाहरणानामुल्लेखः प्राप्यते, सिद्धान्तकौमुद्यादिषु एतेषामुल्लेखः न दृश्यते। सम्भवतः संक्षिप्तसारकारस्य समये कृष्णकथायाः परम्परा पूर्ववत् अतीव प्रसिद्धः आसीत्। यद्यपि पाणिनिना साक्षाद् प्राप्यादिषु कर्मणः विभागं न कृतं तथापि तथायुक्तं चानीप्सितम्[20] इति सूत्रेण अनीप्सितकर्मणः उल्लेखः कृतः। पाणिनीयव्याकरणे कर्मकारकस्य प्रधानं सूत्रं वर्तते कर्तुरीप्सिततमं कर्म[21] इति। संक्षिप्तसारस्य उपरोक्तसूत्रे पाणिनेरिव अनुवृत्तिपद्धतिम् अनुस्रियते।

पाणिनेः अधिशीङ्स्थासां कर्म[22] इति सूत्रम्, क्रमदीश्वरस्य यत्रार्थोऽधिष्ठादेः[23] इति सूत्रं समानमेव। संक्षिप्तसारव्याकरणे अधिपूर्वाणां शी-स्था-आस् इत्यादीनां धातूनामर्थो यस्मिन् आधारे समुपलभ्यते स आधारः कर्मसंज्ञः स्यात् इत्यर्थः लभते। पुनः पाणिनीयव्याकरणे अधिपूर्वाणां शी-स्था-आस् इत्यादीनां धातूनामाधारस्य कर्मसंज्ञा क्रियते। संक्षिप्तसारे पीठमध्यास्ते[24] इति एकमुदाहरणं समुपलभ्यते यस्योल्लेखः पाणिनीयव्याकरणे न प्राप्यते ।

पाणिनेः अभिनिविशश्च[25] इति सूत्रम्, संक्षिप्तसारस्य अभिनेर्विशः[26] इति सूत्रं समानमेव। संक्षिप्तसारे अस्य सूत्रस्यार्थः क्रियते – अभिनिपूर्वकस्य विश्धातोरर्थः यस्मिन् आधारे समुपलभ्यते सः आधारः कर्मसंज्ञः भवति। पाणिनिव्याकरणे

---

8 . सं.का.पा.(सूत्रम् 1).

9 . संक्षिप्तसारव्याकरणम् (कारकपादः) . सम्पादक. गुरुनाथविद्यानिधि. पृष्ठा - 229.

10 . तदेव. पृष्ठा-231.

11 . तदेव. पृष्ठा-230.

12 . अष्टाध्यायी(1.4.54).

13 . अष्टाध्यायी (1.4.55).

14 . सं.का.पा.(सूत्रम् 2).

15 . तदेव.

16 . तदेव.

17 . सं.का.पा.(सूत्रम् 2).

18 . तदेव.

19 . तदेव.

20 . अष्टाध्यायी(1.4.50).

21 . तदेव. (1.4.49).

22 . अष्टाध्यायी (1.4.46).

23. सं.का.पा. (सूत्रम् 2).

24 . सं.का.पा. (सूत्रम् 2).

25. अष्टाध्यायी(1.4.46).

26 . सं.का.पा.(सूत्रम् 4).

अभिनिपूर्वकस्य विश्धातोः आधारस्य कर्मसंज्ञा क्रियते। क्रमदीश्वरस्य अस्मिन् सूत्रे – गृहेऽधिष्ठानम्, कल्याणेऽभिनिवेशः, पापेऽभिनिवेशः [27] इत्यादीनां विरूद्धप्रयोगानां समावेशः परिलक्ष्यते। विवरणीटीकायामस्मिन् विषये उच्यते – "'क्वचिदपवादविषयेऽप्युत्सर्गोऽनिविशत इति न्यायात्' अस्मिन्नेव भाष्यकारवाक्ये अभिनिविशत इति प्रयोगाच्च व्यभिचारः क्वचिद् भवति ।तेन गृहेऽधिष्ठानमित्याद्यपि दृश्यते[28] ।" इति अर्थात् अपवादविषयेऽप्युत्सर्गोऽनिविशत इति भाष्यप्रयोगे निपूर्वकस्य विश्धातोः आधारे सप्तमी विभक्तेः प्रयोगः दृश्यते तस्मात् क्वचित् क्वचित् अभिनिपूर्वकस्य विश्धातोः आधारे सप्तमीविभक्तेरपि प्रयोगः दृश्यते।

क्रमदीश्वराचार्यस्य वसतेरुपान्वध्याङः [29] इति सूत्रम्, पाणिनेः उपान्वध्यान्वध्याङ्वसः [30] इति सूत्रं समानमेव। वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः इति कात्यायनीयवार्तिकस्य अनुरूपं सूत्रं क्रियते आचार्यक्रमदीश्वरेण । तद्यथा – नाभोजनार्थस्य[31] इति सूत्रम् । आचार्यगोयीचन्द्रेण भाष्यकारस्य मतमनुसृत्य अस्य सूत्रस्य खण्डनं क्रियते। तेन उच्यते – "अयं योगो निराकर्तुं शक्यते यतोऽभोजनार्थस्य उपपूर्वस्य वसतेर्न ग्रामोऽधिकरणं, किन्तु केवलस्येति भाष्यम् । ग्रामे वसन् कोऽप्येकरात्रं द्विरात्रं वा उपवसतीत्यर्थः। एवं सत्ययं योगो विस्पष्टार्थः [32]" । इति भाष्यकारेणापि उच्यते – "वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः । ग्रामे उपवसतीति । स तर्हि वक्तव्यः ? न वक्तव्यः। नाऽत्रोपपूर्वस्य वसेर्ग्रामोऽधिकरणम् । कस्य तर्हि ? अनुपसर्गस्य । ग्रामेऽसौ वसंस्त्रिरात्रमुपवसतीति [33] " । इति

संक्षिप्तसारस्य क्रुध्द्रुहोरुपसर्गे सम्प्रदानम् [34], दिवः करणं युगपत् कर्म च [35] इति सूत्रद्वयं तथा च पाणिनेः क्रुधद्रुहरुपसृष्टयोः कर्म [36] दिवः कर्म च [37] इति सूत्रद्वयं तुल्यमेव।

संक्षिप्तसारस्य कर्महेतुर्दुहादेः [38] इत्यस्मिन् सूत्रे शंकरं वरं मृगयते इत्युदाहरणं समुपलभ्यते । अत्र मृग अन्वेषणे इति धातोः प्रयोगः वर्तते । धातूनामनेकार्थत्वात् अत्र याञ्चार्थः वर्तते। दुहादिगणः आकृतिगणः इत्यपि अत्र उच्यते। पाणिनेः दुहादीनां द्विकर्मकाणां धातूनां प्रयोगे कर्मसंज्ञाविधायकं सूत्रमस्ति अकथितं च[39] इति सूत्रम्।

याशिज्ञाब्रुश्रर्थाकर्मणोऽन्यादेः [40] इत्यनेन संक्षिप्तसारसूत्रेण यात्यर्थस्य अश्नात्यर्थस्य ज्ञानार्थस्य ब्रूञर्थस्य श्रृणोत्यर्थस्य अकर्मकस्य च न्यादिवर्जितस्य धातोः प्रयोगे प्रयोज्यकर्ता कर्म भवति। संक्षिप्तसारस्य एतत् सूत्रं पाणिनेः गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ[41] इति इति सूत्रस्य अनुरूपम् । पाणिनेः सूत्रे गत्यर्थकादीनां धातूनामुल्लेखः वर्तते। संक्षिप्तसारे पाणिनेः उल्लिखितानां धातूनां समार्थकधातूनामुल्लेखः अस्ति।

संक्षिप्तसारस्य अनियन्तृप्रयोजके वहिश्च [42] इत्यस्मिन् सूत्रे नीवह्योर्न, नियन्तृकर्तृकस्य वहेरनिषेधः, आदिखाद्योर्न [43] इत्यादिभिः कात्यायनीयवार्तिकैः यत् कार्यं क्रियते तदालोच्यते । नियन्ता कः ? इत्यस्मिन् विषये विवरणीटीकायामुच्यते – 'अस्फुटचेतनानां गवादीनां निरन्तरमधिष्ठाता नियन्ता' [44] इति। संक्षिप्तसारे अनियन्तृप्रयोजकस्य उदाहरणं दीयते – वाहयति धान्यं पुत्रेण कृषकः[45] इति। नियन्तृप्रयोजकस्य उदाहरणं दीयते - वाहयति धान्यं बलीवर्दान् कृषकः , ओदनं धार्मिको वुभुक्षितेन आदयति खादयति[46] इति । एतेभ्यः उदाहरणेभ्यः अनुमीयते यत् क्रमदीश्वरः बङ्गप्रदेशीयः आसीत्। यतः हि बङ्गप्रदेशस्य प्रधानं शस्यं धान्यम्, एवञ्च प्रधानखाद्यमस्ति ओदनम् ततः क्रमदीश्वरः बङ्गप्रदेशीयः आसीत् इति अनुमीयते। काशिकायामेतत् सदृशमन्यत् उदाहरणं समुपलभ्यते नियन्तृप्रयोजकस्य तद्यथा- वाहयति यवान् बलीवर्दानिति[47] इति। अत्रोदाहरणे यवस्योल्लेखः समुपलभ्यते।

भक्षेरहिंसार्थस्य न, शब्दायतेर्न[48] इत्येतयोः कात्यायनवार्तिकयोः यः विषयः वर्तते सः संक्षिप्तसारस्य भक्षिरहिंसायाम् [49] इत्यस्मिन् सूत्रे समुपलभ्यते । अत्र अहिंसार्थस्य उदाहरणं दीयते – भक्षयति भक्तं विप्रेण धार्मिकः[50]। एवञ्च हिंसार्थस्य उदाहरणं दीयते –

27 . तदेव.
28 . तदेव.
29 . तदेव (सूत्रम् 5).
30 . अष्टाध्यायी 1/4/48.
31 . सं.का.पा. (सूत्रम् 6).
32 . सं.का.पा. (सूत्रम् 6).
33 . महाभाष्यम् 1/4/48.
34 . सं.का.पा. (सूत्रम् 7).
35 . सं.का.पा. (सूत्रम् 8).
36. अष्टाध्यायी 1/4/38.
37 . तदेव 1/4/43.
38. सं.का.पा.(सूत्रम् 9).
39 . अष्टाध्यायी 1/4/51.
40 . सं.का.पा.(सूत्रम् 10).
41 . अष्टाध्यायी 1/4/52.
42 . सं.का.पा. (सूत्रम् 11).
43. अष्टाध्यायी 1/4/52.
44 . सं.का.पा.(सूत्रम् 11).
45 . तदेव.
46 . तदेव.
47 . काशिका (1.4.52)
48 . अष्टाध्यायी 1/4/52.
49 . सं.का.पा.(सूत्रम् 12).
50 . सं.का.पा.(सूत्रम् 12).

भक्षयति चौरं श्वानं राजा[51] । अस्मात् उदाहरणात् अनैतिककार्यस्य दण्डविधानव्यवस्था परिदृश्यते तदानीन्तनसमयस्य । शब्दाय इत्यर्थकस्य नामधातोः उदाहरणं दीयते अत्र – ह्वाययति देवदत्तेन गां यज्ञदत्तः[52]। देवदत्तेन क्रन्दयति पितरं यज्ञदत्तः इत्यस्मिन् उदाहरणे क्रद्धातोः (क्रदि आह्वाने रोदने च[53]) आह्वानार्थः गृहीतः, तस्य रोदनार्थोऽपि वर्तते स तु न गृहीतः । अन्यत् उदाहरणं यथा – शब्दाययति पुत्रेण मर्द्दलं देवदत्तः[54] ।

पाणिनेः हृक्रोरन्यतरस्याम् [55] इत्यस्य सूत्रस्य अनुरूपं सूत्रं क्रमदीश्वरस्य कृहृञोः प्रयोगे प्रयोज्यः कर्त्ता कर्म वा भवति [56] इति सूत्रम् । पाणिनिना हृक्रोः धातोः प्रयोगे अणौ कर्ता णौ कर्मसंज्ञा क्रियते संक्षिप्तसारेऽपि कृहृञोः प्रयोगे प्रयोज्यकर्तुः कर्मसंज्ञा क्रियते विकल्पेन। पाणिनिना विकल्पार्थम् अन्यतरस्यामिति पारिभाषिकशब्दस्य प्रयोगः कृतः तथैव क्रमदीश्वरेण वा इति शब्दस्य प्रयोगः कृतः । संक्षिप्तसारे एकमुदारणं प्राप्यते यस्योल्लेखः पाणिनीयव्याकरणे न दृश्यते। तद्यथा – हारयति धनं चौरं चौरेण[57]इति । अस्मात् उदाहरणादपि तदानीन्तनसमाजस्य परिचयः प्राप्यते। पुनः अभिवादिदृशोरात्मनेपदे वेति वाच्यम्[58] इति कात्यायनीयवार्तिकस्य अनुरूपं सूत्रमस्ति क्रमदीश्वरस्य दृश्याभिवाद्योरात्मनेपदे [59] इति सूत्रम् । संक्षिप्तसारे – दर्शयते स्वकार्य्यं पिता पुत्रेण[60] इति सूत्रं प्राप्यते, पाणिनीयव्याकरणे अस्योल्लेखः न दृश्यते।

**करणकारकम्**

पाणिनिना करणकारकस्य संज्ञा क्रियते – साधकतमं करणम्[61] इति । पाणिनिना प्रकृष्टमर्थं बोधयितुं सूत्रे तमप्प्रत्ययस्य ग्रहणं कृतम्। पाणिनीयव्याकरणे सूत्रस्यास्य उदाहरणं दीयते - रामेण बाणेन हतो वाली[62] इति। संक्षिप्तसारव्याकरणे करणकारकस्य सूत्रं क्रियते आचार्येण क्रियातिसाधनं करणम् [63] इति। अत्र प्रकृष्टमर्थं बोधयितुं अतिशब्दस्य प्रयोगः क्रियते। कर्ता यद्व्यापारानन्तरं क्रियामुत्पादयति तत् क्रियातिसाधनं करणसंज्ञं भवति इति सूत्रार्थः। अत्र उदाहरणं दीयते – अश्वेन ग्रामं गच्छति मैत्रः इति । अत्र उदाहरणे कर्ता मैत्रः अश्वस्य पादविक्षेपादिव्यापारानन्तरमेव गमनक्रियां सम्पादयति ततः क्रियातिसाधकं अश्वमत्र करणम् ।

**सम्प्रदानकारकम्**

पाणिनीयव्याकरणे सम्प्रदानसंज्ञायाः प्रधानसूत्रं वर्तते - कर्मणा यमभिप्रैति स सम्प्रदानम्[64] इति। संक्षिप्तसारे सम्प्रदानकारकस्य प्रधानसूत्रं कृतम् – प्रदानलप् सम्प्रदानम् [65] इति। संक्षिप्तसारे क्रमदीश्वरेण सूत्रस्य मात्रालाघवः क्रियते। प्रदानं लभते इति प्रदानलप् । सूत्रस्यास्य अर्थः यथा – कर्त्रा क्रियमानं प्रकृष्टमात्यन्तिकं दानं यो लभते सः सम्प्रदानसंज्ञः स्यात् । विवरणीकारेण आत्यन्तिकदानविषये उच्यते – 'यस्य पुनरादानं नास्ति तदात्यन्तिकं दानम्'[66] इति । अत्रोदाहरणे महाकविभारवेः उक्तिरपि क्रमदीश्वरेण उल्लिख्यते। तद्यथा — ''यच्छति प्रतिमुखं दयितायै वाचमन्तिकगतेऽपि शकुन्ता''विति [67] । अस्य सूत्रस्य विवरणीटीकायाम् रजकाय वस्त्रं ददाति[68] इति प्रयोगं भविष्यति न वा इत्यस्मिन् विषये विचारः वर्तते । यद्यपि कर्त्रा क्रियमाणं दानमत्र रजकः लभ्यते तथापि अत्र आत्यन्तिकं दानं नास्ति । यतः हि रजकाय क्रियमाणस्य दानस्य पुनरादानमत्र अस्ति, ततः अत्र यत् दानं वर्तते तत्तु न आत्यन्तिकं दानम्। तस्मात् सम्बन्धमात्रविवक्षायां षष्ठी भवति। पुनः यत् कर्त्रा क्रियमाणमात्यन्तिकं दानम्, यत्तेन स्वेच्छया दीयते, न तु भयादिना तत् सम्प्रदानं भवति । यत्तु दानं भयादिना भवति तत्र सम्प्रदानं न भवति । तस्मात् – घ्नतः पृष्ठं ददाति, राज्ञो दण्डं ददातीत्यादौ [69] सम्प्रदानं न भवति । प्रथमोदाहरणे कर्त्ता पृष्ठप्रदर्शनं करोति । पृष्ठप्रदर्शनं पराजयस्य प्रतीकम्। पराजयः केनापि स्वेच्छया न स्वीक्रियते ततः एतत् पृष्ठप्रदर्शनम् अनिच्छापूर्वकम् भयहेतुर्वा। एवम्प्रकारेण द्वितीयोदाहरणे राज्ञः दण्डविधानं क्रियते। परन्तु कोऽपि स्वेच्छया दण्डं न गृह्णाति तस्मात् अत्रापि सम्प्रदानसंज्ञा भवति । विवरणीटीकायाम् अनिच्छापूर्वकं दानं कथं सम्प्रदानं न भवति इत्यस्मिन् विषये उच्यते – ''नन्वयन्तु विशेषः कथमवगम्यते ? सम्प्रदानमिति

51 . तदेव.
52 . तदेव.
53 . कौ.धा. 71.
54 . सं.का.पा. (सूत्रम् 12).
55 . अष्टाध्यायी. 1/4/53.
56 . सं.का.पा. (सूत्रम् 14).
57 . तदेव.
58 . अष्टाध्यायी. 1/4/53.
59 . सं.का.पा. (सूत्रम् 15).
60 . तदेव.
61 . अष्टाध्यायी. 1/4/42.
62 . सि. कौ. सूत्रम् 561.
63 . सं.का.पा. (सूत्रम् 16).
64 . अष्टाध्यायी 1.4.32.
65 . सं.का.पा. (सूत्रम् 17).
66 . तदेव.
67 . तदेव.
68 . तदेव.
69 . सं.का.पा. (सूत्रम् 17).

महत्याः संज्ञायाः अन्वर्थविज्ञानात् तद्धि सम्प्रदानं भवति यत् स्वेच्छया दीयते [70]।" इति

पाणिनेः स्पृहेरीप्सितः [71] इति सूत्रेण सह संक्षिप्तसारस्य ईप्सितादि स्पृहादेः [72] इति सूत्रस्य साम्यं वर्तते। क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् [73] इति कात्यायनीयवार्तिकम् अनुसृत्य सूत्रं क्रियते संक्षिप्तसारकारेण तद्यथा – यदभिप्रेत्य धात्वर्थः[74] इति। अत्र रघुवंशात् एकमुदाहरणम् उद्ध्रियते। तद्यथा – "तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शन "[75] इति । पुनः पाणिनेः धारेरुत्तमर्णः [76] इति सूत्रस्य स्थाने संक्षिप्तसारस्य सूत्रमस्ति साधुर्धारयते [77] इति । अत्र साधुशब्देन उत्तमर्णः धनस्वामी वा उक्तः । पुनः रुच्यर्थकानां धातूनां प्रयोगे सम्प्रदानसंज्ञार्थं संक्षिप्तसारे सूत्रं क्रियते - यत्प्रीतिकृद्रुच्यर्थकर्त्ता [78] इति। पुनः क्रुधद्रुहेर्ष्यासूयार्थानां धातूनां कोपार्थे सम्प्रदानसंज्ञार्थं सूत्रं क्रियते संक्षिप्तसारव्याकरणे क्रुधद्रुहेर्ष्यासूयार्थानां यत्रार्थः कोपे [79] इति। पुनः सम्प्रदानसंज्ञार्थम् – श्लाघादेर्यज्ञीप्सा, राधीक्षोर्विविधप्रश्नो यस्य, प्रत्याङ्भ्यां श्रुवोऽनुप्रतिगृणश्च गम्यपूर्वक्रियाकर्त्ता [80] इत्यादीनां सूत्राणामालोचना क्रियते।

**अपादानकारकम्**

पाणिनिना यथैव अपादानस्य प्रधानसूत्रं कृतम् ध्रुवमपायेऽपादानम्[81] तथैव संक्षिप्तसारव्याकरणे अपादानकारकस्य प्रधानसूत्रं वर्तते चलत्प्राग्भूरपादानम् [82] इति । चलतः प्राक्सम्बन्धिस्थानम् अपादानसंज्ञं भवति इति सूत्रार्थः । अस्य सूत्रस्य विवरणीटीकायामुच्यते – चलत्शब्देन मुख्यं चलत्वं तथा गौणचलत्वम् उभयमेव ग्रहीतव्यम् । ततः सत्यात् स्खलति वचनम् , आचाराच्चलति चित्तमित्यादीनि उदाहरणानि अपि सिद्धानि भवन्ति । एवम्प्रकारेण जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् इति कात्यायनवार्तिकेन यत् कार्यं विधीयते तदपि अस्य संक्षिप्तसारसूत्रस्य विवरणीटीकायामपि आलोच्यते आचार्यगोयीचन्द्रेण। विवरणीटीकायामुच्यते तेन – 'अधर्मात् विरमतीत्यादौ विरतिरत्र चित्तनिवृत्तौ वर्तते' [83]। इति एवञ्च जुगुप्सार्थकस्य धातोः कृते उच्यते यथा – 'अधर्माज्जुगुप्सते इत्यत्रापि गर्हायाश्चित्तनिवृत्तिर्जुगुप्सा' [84] इति।

आख्यातोपयोगे [85] इति पाणिनीयसूत्रस्य अनुरूपं सूत्रमस्ति संक्षिप्तसारव्याकरणे गुर्व्वादीङर्थादेः[86] इति। इङ् अध्ययने[87] इति धातुना अत्र अध्ययनरूपार्थः प्राप्यते । पुनः गुरुपदेन अत्र नियमपूर्वकविद्यास्वीकारस्य उल्लेखः प्राप्यते । अस्य सूत्रस्य विवरणीटीकायामुच्यते – 'यदैव गुरोरध्ययनम्, तदा नियमपूर्वकमेव भवति, अन्यथा गुरुत्वानुपपत्तेः' [88] इति। अत्र नियमपूर्वकस्य विद्यास्वीकारस्योल्लेखः प्राप्यते। परन्तु पाणिनेरिव अत्र उपयोगशब्देन नियमपूर्वकस्य विद्यास्वीकारस्योल्लेखः नास्ति। अत्र उदाहरणं दीयते उपाध्यायादधीते पठति श्रृणोति जानातीत्यादिः ।

अस्य सूत्रस्य टीकायां बौद्धापादानत्वं स्वीकृत्य उच्यते – "अयं योगो विस्पष्टार्थः । तथाहि उपाध्यायादधीते इति ज्ञानं गृह्णातीत्यर्थः । ज्योतिर्व्वत् ज्ञानानि भवन्तीति भाष्यम् । गुरुस्थितं ज्ञानं शिष्ये उत्पत्स्यमाने सजातीये ज्ञाने विशेषमुत्पादयति। यद्यपि ज्ञानस्यात्मगुणस्य निष्क्रियत्वेन सञ्चरणं न सम्भवति, तथापि तच्छिष्ये ज्ञानान्तरं जनयत् सञ्चरतीवेति औपचारिकविश्लेषस्य सम्भवादेवापादानं भवतीति" [89]। इति

विद्याग्रहणं नियमपूर्वकं न भवति चेत् तत्र अपादानं न भवति । संक्षिप्तसारे अस्मिन् विषये सूत्रं वर्तते अगुरुत्वे षष्ठी[90] इति । उदाहरणं दीयते अत्र – नटस्य गीतं श्रृणोति । इति पाणिनीयव्याकरणे उदाहरणं दीयते – नटस्य गाथां श्रृणोति[91] इति।

पाणिनेः पराजेरसोढः [92] इति सूत्रवत् अनुरूपं सूत्रं क्रियते क्रमदीश्वराचार्येण । तस्य सूत्रमस्ति पराजेः सोढुमशक्यम्[93] इति। उदाहरणं दीयते अत्र – युद्धात् पराजयते। युद्धं सोढुं न शक्यते इत्यर्थः। भाष्यकारपतञ्जलेरिव अत्रापि संक्षिप्तसारव्याकरणे

[70]. सं.का.पा. (सूत्रम् 17).
[71] . अष्टाध्यायी 1/4/36.
[72] . सं.का.पा. (सूत्रम् 18).
[73] . अष्टाध्यायी 1/4/32.
[74] . सं.का.पा. (सूत्रम् 19).
[75] . सं.का.पा. (सूत्रम् 19).
[76] . अष्टाध्यायी. 1/4/35.
[77] . सं.का.पा. (सूत्रम् 21).
[78] . तदेव (सूत्रम् 20).
[79] . सं.का.पा. (सूत्रम् 22).
[80] . सं.का.पा. (सूत्रम् 23,24,25).
[81] . अष्टाध्यायी. 1/4/24.
[82] . सं.का.पा. (सूत्रम् 26).
[83] . तदेव. (सूत्रम् 26).
[84] . तदेव.
[85]. अष्टाध्यायी. 1/4/29.
[86] . सं.का.पा. (सूत्रम् 27).
[87] . कौ.धा. 1046.
[88] . सं.का.पा. (सूत्रम् 27).
[89] . सं.का.पा. (सूत्रम् 28).
[90] . तदेव. (सूत्रम् 28).
[91] . काशिका 1.4.29.
[92] अष्टाध्यायी 1/4/26.
[93] . सं.का.पा. (सूत्रम् 29).

बौद्धापादानसंज्ञा स्वीक्रियते। ततः विवरणीटीकायां गोयीचन्द्रेण उच्यते – "यदा तु युद्धं प्राप्य ततश्चलति, तदा पूर्वेणैव अपादानसंज्ञायां प्राप्तायां वचनमिदं स्पष्टार्थम्" [94] । इति भाष्यकारेण पतञ्जलिनापि बौद्धापादनमाश्रित्य उच्यते – "अयमपि योगः शक्योऽवक्तुम् । कथम् अध्ययनात्पराजयते इति ? य एष मनुष्यः प्रेक्षापूर्वकारी भवति ,स पश्यति - दुःखमध्ययनं दुर्धरं च, गुरवश्च दुरुपचारा इति, स बुद्ध्या संप्राप्य निवर्तते । तत्र ध्रुवमपायेऽपादानम् (अ १.४.२४) इत्येव सिद्धम्"[95]। इति

भयार्थानां त्राणार्थानां धातूनां प्रयोगे अपादानसंज्ञार्थं क्रमदीश्वराचार्येण सूत्रं क्रियते – भीत्रार्थयोर्भीहेतुः[96] इति सूत्रम्। अस्य सूत्रस्य टीकायां बौद्धापादानमाश्रित्य भाष्यमनुसृत्य गोयीचन्द्रेण उच्यते – "अयमपि योगः पूर्वस्यैव प्रपञ्चः। तथाहि व्याघ्राद्बिभेति इति य एवं प्रेक्षावान् भवति, स यदि मां व्याघ्रः पश्येद् तदा ध्रुवं मृत्युरिति मनसा व्याघ्रं तं प्राप्य ततश्चलति, शत्रोस्त्रायते इत्यत्रापि यद्येवं शत्रुः पश्येत् तदा ध्रुवं मृत्युरिति मनसा शत्रुं गृहीत्वा ततो निवर्त्तते "।[97] इति भयार्थानां त्राणार्थानां धातूनां प्रयोगे अपादानसंज्ञार्थं पाणिनिना सूत्रं कृतम् – भीत्रार्थानां भयहेतुः[98] इति। संक्षिप्तसारे वर्णलाघवः अस्ति। तत्र भीत्रा इति धातुनिर्देशः तयोः अर्थः इव अर्थः ययोः इति भीत्रार्थौ तयोः भीत्रार्थयोः। एवम्प्रकारेण संक्षिप्तसारे द्विवचनस्य प्रयोगः दृश्यते। पाणिनेः सूत्रे — भयं भीः, त्राणं त्राः, सम्पदादित्वाद्भावे क्विप्। भीत्रौ अर्थौ येषां ते भीत्रार्थाः एवम्प्रकारेण बहुवचनस्य प्रयोगः अत्र सम्प्राप्यते। पुनः संक्षिप्तसारे भीशब्दस्य प्रयोगः वर्तते, पाणिनीयव्याकरणे भयशब्दस्य प्रयोगः वर्तते।

पाणिनेः अन्तर्धौ येनादर्शनमिच्छति [99] इति सूत्रस्य अनुरूपं सूत्रं संक्षिप्तसारस्य अन्तर्द्ध्यर्थे यदीयादर्शनमिच्छति [100] इति सूत्रम्। अस्य सूत्रस्योदाहरणं दीयते संक्षिप्तसारे – उपाध्यायादन्तर्द्धत्ते छात्रः पलायते निलीयते लुक्कायति [101] इति। एतदुदाहरणं काशिकायामपि समुपलभ्यते। परन्तु 'लुक्कायति' इत्यस्याः क्रियायाः प्रयोगः ग्रन्थकर्तुः मौलिकचिन्तनम् । अनेन उदाहरणेन ज्ञायते यत् पूर्ववत् तदानीन्तनसमाजेऽपि उपाध्यायानां शासनमतीव कठोरमासीत्। अनेन सूत्रेण कृतापादानसंज्ञा बौद्धापादानसंज्ञामाश्रित्यैव सिध्यति । तस्मात् अस्य सूत्रस्य विवरणीटीकायामुच्यते – 'अयमपि योगः पूर्ववदपादानसंज्ञायां तथैव प्रपञ्चार्थः' [102]। इति

वारणार्थानां धातूनां प्रयोगे निमित्तस्य अपादानसंज्ञाविधानार्थं संक्षिप्तसारे सूत्रं क्रियते – वारणादेर्यन्निमित्तम् [103] इति सूत्रम्। पाणिनिना यथैव तस्य वारणार्थानामीप्सितः [104] इत्यस्मिन् सूत्रे ईप्सितशब्दस्य प्रयोगः कृतः तथैव आचार्यक्रमदीश्वरेण तस्य अस्मिन् अपादानसूत्रे निमित्तम् इति शब्दस्य प्रयोगः कृतः । आचार्यजुमरनन्दिना तस्य रसवतीवृत्तौ जुगुप्साविरामप्रमादादीनां धातूनामुल्लेखेन अपादानस्य आलोचना कृता । इतः पूर्वं चलत्प्राग्भूरपादानम् इत्यस्य सूत्रस्य विवरणीटीकायाम् एतेषां धातूनां प्रयोगे कदा अपादानसंज्ञा विधीयते तदालोच्यते । विवरणीकारेण अत्रापि बौद्धापादानं स्वीक्रियते।

जन्यर्थकर्तुः प्रकृतिः [105] इति संक्षिप्तसारसूत्रे उच्यते – जनिरुत्पत्तिरर्थो येषां ते जन्यर्थाः, तेषां कर्त्ता जायमानः, तस्य प्रकृतिः कारणमपादानसंज्ञः स्यात् । अस्य सूत्रस्य रसवतीवृत्तौ जुमरनन्दिना येषामुदाहरणानामुल्लेखः कृतः तेषामुल्लेखः काशिकायां समुपलभ्यते । केवलं पितुः पुत्रः जायते इत्यस्योदाहरणस्य उल्लेखः यद्यपि सिद्धान्तकौमुद्यां तथा काशिकायां न दृश्यते तथापि सिद्धान्तकौमुद्याः ब्रह्मणः प्रजाः प्रजायन्ते इत्यस्योदाहरणस्य सदृशमेव एतदुदाहरणम्। उभयत्र उदाहरणयोः जन्यर्थकर्तुः निमित्तकारणम् यथाक्रमेण पिता ब्रह्मा च।

भूकर्तुः आद्यप्रकाशस्थानस्य अपादानसंज्ञार्थं पाणिनिना सूत्रं कृतं भुवः प्रभवः [106] इति। क्रमदीश्वरेण सूत्रं कृतम् भुव आद्योपलम्भस्थानम् [107] इति। द्वयोरर्थः समानः एव। भूधातोः कर्तुः यदाद्योपलम्भस्थानं प्रकाशस्थानं वा तदपादानं स्यात्।

### अधिकरणकारकम्

अधिकरणसंज्ञार्थं पाणिनिना सूत्रं कृतम् 'आधारोऽधिकरणम्'[108] इति। तत्र आधारपदेनैव त्रिविधाधाराणामुल्लेखः कृतः। पुनः आचार्यक्रमदीश्वरेण सूत्रे साक्षादेव वैषयिकादीनामाधाराणाम् उल्लेखः कृतः। तस्य अधिकरणविषयकं सूत्रमस्ति वैषयिकाद्यधिकरणम् [109] इति। आदिपदेन तेन

94 . तदेव.
95 . अष्टाध्यायी 1/4/26.
96 . सं.का.पा. (सूत्रम् 30).
97 . सं.का.पा. (सूत्रम् 30).
98 . अष्टाध्यायी 1/4/25.
99 . तदेव 1/4/28.
100 . सं.का.पा. (सूत्रम् 31).
101 .तदेव.
102 . तदेव.
103 . सं.का.पा. (सूत्रम् 32).
104 . अष्टाध्यायी. 1/4/27.
105 . सं.का.पा. (सूत्रम् 33).
106 . अष्टाध्यायी 1/4/31.
107 . सं.का.पा. (सूत्रम् 34).
108 . अष्टाध्यायी. 1/4/45.
109 . सं.का.पा. (सूत्रम् 35).

औपश्लेषिकाभिव्यापकयोः ग्रहणं कृतम्। जुमरनन्दिनः रसवतीवृत्तौ वैषयिकाधिकरणस्य धर्मे वेदाः प्रमाणम् इति उदाहरणं प्राप्यते। अन्येषामुल्लेखः काशिकासिद्धान्तकौमुद्योः समुपलभ्यते।

**विवक्षातः प्राप्तानां कारकाणां कृते सूत्रम्**

विवक्षावशात् कारकाणि भवन्ति [110] सूत्रमेतत् क्रमदीश्वरस्य स्वकीयचिन्तनस्य फलम्। स्थाल्या पचति, स्थाल्यां पचति, स्थाली पचति इत्यादीनां शिष्टप्रयोगाणां लक्षणेषु सन्दिहानजनस्य सन्देहनिरासार्थम् आचार्यक्रमदीश्वरेण उपरोक्तं सूत्रं रचितम्। वक्तुमिच्छा विवक्षा इति व्युत्पत्त्या वक्तुः आयत्तत्वात् कर्त्रादीनि कारकाणि षड् भवन्ति। एवंरूपेण यदा प्रयोक्तुः यादृशी विवक्षा भवति तदा तादृशं कारकं भवति। अत्र सूत्रे एकः प्रश्नः उत्थाप्यते तद्यथा – चैत्रोऽश्वेन ग्रामं न गच्छतीत्यत्र[111] चैत्रादीनाम् (चैत्रः, अश्वः, ग्रामः) कथं कर्तृकरणकर्मसंज्ञा ? यतो यस्यां क्रियायां सत्यां एतानि कर्तृकरणकर्मकारकाणि भवन्ति, सैव गमनक्रिया अत्र निषिध्यते ? अस्योत्तरे उच्यते – पूर्वं नञो योगस्तु विरुद्ध एव, यतः कर्तृकरणकर्मविषया हि गमनक्रिया अत्र प्रतिषेद्धुमिष्टा, तस्याश्चाभावे विषयाभावादेव पूर्वप्रतिषेधोऽयुक्तः ।

**निष्कर्षः**

संक्षिप्तसारव्याकरणं प्रकरणमूलकं व्याकरणम् । अत्र कारकपादे आचार्येण कारकसूत्रमुपस्थाप्य विभक्त्यादीनि सूत्राणि वर्णितानि । अत्र प्रायः सर्वाणि सूत्राणि पाणिनिमनुसृत्य रचितानि । परन्तु अत्र व्याकरणे प्रक्रियाक्रममनुसरति। उदाहरणेष्वपि बहुत्र मौलिकतां परिलक्ष्यते। क्वचित् नूतनधातूनामुल्लेखोऽपि दृश्यते। संक्षिप्तसारस्य क्रियामुख्यप्रयोजकौ कर्त्ता[112] इति सूत्रे कर्त्तृ इति शब्दः वर्तते, परन्तु पाणिनीयव्याकरणे स्वतन्त्र कर्ता[113]। अपादानकारके पतञ्जलेरिव बौद्धापादानं स्वीक्रियते आचार्यगोयीचन्द्रेण। विवक्षया कारकाणां व्यवस्था क्रमदीश्वरस्य श्रेष्ठतायाः परिचयं वहति। अपि च संक्षिप्तरारस्य अनेकेषु उदाहरणेषु तदानीन्तनसमाजस्य परिचयः समुपलभ्यते। अन्यत् सर्वं कारकम् आचार्येण वैज्ञानिकपद्धत्या सुष्ठु प्रतिपादितम् इति शम् ।

**Abbreviation**

1. तै.सं. तैत्तिरीयसंहिता।
2. सं.का.पा. संक्षिप्तसारकारकपादः।
3. कौ.धा. कौमुदीधातुः।

**References**


1. Bhaṭṭoji-Dīkṣita. Siddhānta-Kaumudī. Ed. Giridhar Sharma and Parameswarananda Sharma. Vaiyākaraṇa-siddhānta-kaumudī, with Vāsudev- Dīkṣita's comm. Bālamanoramā & Jñānendra-saraswati's comm. Tattvabodhinī.vol.1,2. Varanasi ( now Benaras ) : Motilal Banarasidas; c2011 ( Rpt.)
2. Bopadeva. Kavikalpadruma. Ed. Gajanan Balkrishna Palsule. Poona: Bhandarkar Oriental Research Institute; c1954 .
3. Devasharma, Kalijivan. ŚabdaśāstreraItihasa. Kolkata: Ramakrishna Mission Institute of Culture; c2022 (Rpt.; 1st ed. 1995).
4. Gurupada Haldar. Vyākaraṇa Darśaner Itihāsa Vol.1.1350 B.Y. online sourse: https://granthagara.com/boi/306889-byakaran-darshaner-itihas-vol-1/
5. Jayāditya/Vāmana. Kāśikā. Ed. Jayashankar Lal Tripathi and Sudhakar Malaviya, with jayashankar's Hindi comm. Bhāvabodhinī, along with Jinendrabuddhi's Nyāsa and Haradatta-Miśra's comm. Padamañjarī. Varanasi (now Benaras): Tara Book Agency, 2018 ( Rpt.; 1st ed. 1984).
6. Kramadiśvara. Saṃkṣiptasāra Vyākaraṇa. Ed. Gurunath Bidyanidhi Bhattacharya, with Jumaranandi's Rasavatīvṛtti along with Goyichandra's comm. Vivaraṇī. Not available.
7. Kramadiśvara. Saṃkṣiptasāra Vyākaraṇa. Ed. R. S. Saini., with Jumaranandi's Rasavatīvṛtti along with Goyichandra's comm. Vivaraṇī. Delhi: Bharatiya Vidya Prakashan; c2000.
8. Patañjali. Mahābhāṣya. Vyākaraṇamahābhāṣye Prathama khaṇḍa with Sanskrit comm. Pradīpa, Uddyota, chāyā. Varanasi (now Benaras): Motilal Banarasidas; c1967.
9. Patañjali. Mahābhāṣya. Ed. Harinarayan Tiwari. Vyākaraṇamahābhāṣya, with won Hindi comm. Jyotsnā. Varanasi (now Benaras): Chaukhamba Vidyabhaban; c2014 (Rpt.)
10. Pāṇini. Aṣṭādhyāyīsūtrapāṭhah. Ed. Pushpa Dikshit. Delhi: Jnanbharati Publication; c2009.
11. Taittirīya-saṁhitā. Ed. Basanta Shripad Satbalekar. pardi-nagara (Surat Pradesh). Bharat Mudranalaya, swadhyaya-mandala; c1957.
12. Mimāmamsak, Yudhiṣṭhira. SanskritaVyākaraṇa Śāstra ka Itiāsa. Sonipat (Hariyana): Ramlal kapur trust, (Rpt.); c2016.
13. Sanskrit Vangmay ka Brihad Itihas. Ed. Baldev Upadhyay and Gopal Datta Pandeya. Lakhnau: Uttar Pradesh Sanskrit Sansthan; c2001.


---

[110]. सं.का.पा. (सूत्रम् 36).

[111]. तदेव.

[112]. सं.का.पा.(सूत्रम् 1).

[113]. अष्टाध्यायी 1.4.54.